This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥अथचन्द्रालोकः प्रारभ्यते॥

Title — चन्द्रलोकः
Author — जयदेवः
Date — ?
Subject — अलंकारशास्त्र.
folio — 13
Xerox — 26
Acc. No. — ~~2565~~ M-1820

KKSU LIBRARY
RAMTEK
441 106
M-1820
Dist Nagpur

Checked 2012

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चन्द्रा० श्रीगणेशाय नमः ॥ श्रीसंकयायेनमः ॥ अथालङ्कारा लिख्यन्ते ॥ शब्दार्थयोः
॥१॥ प्रसिध्या वा कवेः श्रौढिवशेन वा ॥ हारादिवदलङ्कारस्सन्निवेशो मनोहरः
॥१॥ स्वरव्यंजनसन्दोहव्यूहा मन्दोहदोहदा ॥ गौर्जगज्जाग्रदुत्सेकाछे
कानुप्रासभासुराँ ॥२॥ आवृत्तवर्णसम्पूर्णं वृत्त्यनुप्रासवद्वचः ॥ अमन्दा
नन्दसन्दोहस्वच्छन्दास्पन्दमन्दिरम् ॥३॥ लाटानुप्रासभूर्भिन्नाभिप्राया
पुनरुक्तता ॥ यत्र स्यान्न पुनश्शात्त्वोर्गर्जितं तज्जितं जितम् ॥४॥ श्लोक वृसिंह
स्यार्द्धे तदर्द्धे वा वर्णावृत्तिर्यदि ध्रुवा ॥ तदा मतामतिमतां स्फुटानुप्रा ॥१॥
४ वर्णसाम्यमनुप्रास इति सामान्यलक्षणम् ॥४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सतासतां ॥५॥ उपमेयोपमानादावर्थानुप्रासइष्यते ॥ चन्दनं खलुगोविन्दचरणद्वन्द्ववन्दनम् ॥६॥ पुनरुक्तप्रतीकाशम्पुनरुक्तार्थसन्निभम् ॥ अंशुकान्तंशशी कुर्वन्नंबरान्तमुपैत्यसौ ॥७॥ आवृत्तवर्णस्तवकस्तवकन्दांकुरं कवेः ॥ यमकं प्रथमाधुर्य्यमाधुर्य्यवचसो विदुः ॥८॥ काव्यवित्प्रवणैश्चित्रं खड्गबन्धादि लक्ष्यते ॥ तेष्वाद्यमुच्यते श्लोकद्वयी सज्जनरञ्जिका ॥९॥ कामिनीवधवत्खड्गलेखाचारुकरालिका ॥ काश्मीरसेकारक्ताङ्गी शत्रुकण्ठान्तिकाश्रिता ॥१०॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चंद्रा० उपमा यत्र सादृश्यलक्ष्मीरुल्लसति द्वयोः ॥ हृदये खेलतो रुच्चैस्तन्वङ्गीस्तनयो

॥२॥ रिव ॥११॥ उपमानोपमेयत्वे यत्रैकस्यैव जाग्रतः ॥ इन्दुरिन्दुरिवेत्यादो

भवेदेवमनन्वयः ॥१२॥ पर्यायेण द्वयोस्तच्चेदुपमेयोपमा मता ॥ धर्मोऽर्थ

इव पूर्णश्रीरर्थो धर्म इव त्वयि ॥१३॥ विख्यातस्योपमानस्य यत्र स्यादुपमे

यता ॥ इन्दुर्मुखमिवेत्यादौ स्यात्प्रतीपोपमा तदा ॥१४॥ उपमाने तुली

लादिपदाढ्ये ललितोपमा ॥ त्वन्नेत्रयुगलं धत्ते लीलां नीलाम्बुजन्मनोः ॥ नृसिंह

१५ ॥ अनेकस्यार्थयुग्मस्य सादृश्यं स्तबकोपमा ॥ श्रितोस्मिन्चरणौ विष्णो ॥२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भृङ्गस्तामरसं यथा ॥ १६ ॥ स्यात्संपूर्णोपमा यत्र द्वयोरपि विधेयता ॥ पद्मानी
वचिनिद्राणि नेत्राण्यासन्न हर्मुखे ॥ १७ ॥ यत्रोपमानचित्रेण सर्वथाप्युप
रज्यते ॥ उपमेयमयी भित्तिस्तत्र रूपकमिष्यते ॥ १८ ॥ समानधर्मयु
क्साध्यारोपात्सोपाधिरूपकम् ॥ उत्सिक्तक्षितिभृल्लक्ष्य पक्षच्छेदपुर
न्दरः ॥ १९ ॥ पृथक्कथितसादृश्यन्दृश्यं सादृश्यरूपकम् ॥ उल्लसत्पञ्च
शाखस्ते राजते भुजभूरुहः ॥ २० ॥ स्यादङ्गयष्टिरित्येवंविधमाभासरूप
कम् ॥ अङ्गयष्टिधनुर्वल्लीत्यादिरूपितरूपकम् ॥ २१ ॥ परिणामोऽनयो



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चन्द्रा॰ र्यस्मिन्न भेदः पर्यवस्यति ॥ कान्तेन पृष्टा रहसि मौनमेवोत्तरं ददौ ॥२२॥ ब
॥३॥ हुभिर्बहुधोल्लेखादेकस्योल्लेखिता मता ॥ स्त्रीभिः कामः प्रियैश्चन्द्रः का
लः शत्रुभिरैक्षि सः ॥२३॥ अतथ्यमारोपयितुं तथ्यापास्तिरपह्नुतिः
॥ नायं सुधांशुः किं तर्हि व्योमगङ्गासरोरुहम् ॥२४॥ पर्यस्तापह्नुति
र्यत्र धर्ममात्रं निषिध्यते ॥ नायं सुधांशुः किं तर्हि सुधांशुः प्रेयसीमुखं
॥२५॥ भ्रान्तापह्नुतिरन्यस्य शङ्कया तथ्यनिर्णये ॥ तापं तनोति सोत्कंपं नृसिंह
ज्वरः किं न सखि स्मरः ॥२६॥ छेकापह्नुतिरन्यस्य शङ्कया तथ्यनिह्न ॥३॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वे ॥ प्रजल्पन्मत्पदे लग्नः कान्तः किं न हि नूपुरः ॥२७॥ कैतवं व्यज्य
मानत्वे व्याजाद्यैर्निह्नुतेः पदैः ॥ निर्यान्ति स्मरनाराचाः कान्ता दृक्
पातकैतवात् ॥२८॥ उत्प्रेक्षोन्नीयते यत्र हेत्वादिर्निह्नुतिं विना ॥ त्वन्मु
खश्रीकृते नूनं पद्मैर्वैरायते शशी ॥२९॥ इवादिकपदाभावे गूढोत्प्रे
क्षां प्रचक्षते ॥ यत्कीर्तिर्भ्रमणश्रान्ता विवेश स्वर्गनिम्नगाम् ॥३०॥
स्यात्स्मृतिभ्रान्तिसन्देहैस्तदेवालंकृतित्रयम् ॥ पंकजं पश्यतस्तस्या
मुखं मे गाहते मनः ॥३१॥ अयं प्रमत्तमधुपस्त्वन्मुखं वेद पंकजं ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चन्द्रा० पंकजं पश्यत कस्या मुखं वा सुधांशुर्वेत्यस्माकं तु न निर्णयः ॥३२॥ मीलितं ब
॥४॥ हुसादृश्याद्भेदवच्चेन्न लक्ष्यते ॥ रसो नालक्षि लाक्षायाश्चरणे सहजारुणे ॥
३३॥ सामान्यं यदि सादृश्याद्भेद एव न लक्ष्यते ॥ पद्माकरप्रविष्टानां मुखं
नालक्षि सुभ्रुवाम् ॥३४॥ हेतोः कुतोऽपि वैशिष्ट्यास्फूर्तिरुन्मीलितं मतं ॥
लक्षितान्युदिते चन्द्रे पद्मानि च मुखानि च ॥३५॥ अनुमानं च कार्यादेः का
रणाद्यवधारणम् ॥ अस्ति किंचिद्यदनया मां विलोक्य स्मितं मनाक् ॥३६॥ नृसिंह
अर्थापत्तिः स्वयं सिध्येत्पदार्थान्तरवर्णनम् ॥ स जितस्त्वन्मुखेनेन्दुः ॥४॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

का वार्त्ता सरसीरुहाम् ॥ ३७ ॥ स्यात्काव्यलिङ्गं वागर्थो नूतनार्थसमर्पकः
॥ जितोसि मन्द कन्दर्प मच्चितेस्ति त्रिलोचनः ॥ ३८ ॥ अलङ्कारः परिकरः
साभिप्राये विशेषणे ॥ सुधांशुकलितोत्तंसस्तापं हरतु वः शिवः ॥ ३९ ॥
साभिप्राये विशेष्ये तु भवेत्परिकराङ्कुरः ॥ चतुर्णां पुरुषार्थानां दाता दे
वश्चतुर्भुजः ॥ ४० ॥ अक्रमातिशयोक्तिश्चेद्युगपत्कार्यकारणे ॥ आलिं
गति समं देव ज्यां शराश्च पराश्च ते ॥ ४१ ॥ अत्यन्तातिशयोक्तिस्तु पौ
र्वापर्यव्यतिक्रमे ॥ अग्रे मानो गतः पश्चादनुनीता प्रियेण सा ॥ ४२ ॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चन्द्रा० चपलातिशयोक्तिस्तु कार्ये हेतुप्रसक्तिजे ॥ यामीति प्रियपृष्टायावल
॥५॥ योऽभवदूर्मिका ॥४३॥ संबन्धातिशयोक्तिस्स्यात्तदभावेपि तद्वचः ॥
पश्य सौधाग्रसंसक्तं विभाति विधुमण्डलम् ॥४४॥ भेदकातिशयो
क्तिश्चेदेकस्यैवान्यतोच्यते ॥ अहो अन्यैव लावण्यलीला बालाकुच
स्थले ॥४५॥ रूपकातिशयोक्तिश्चेद्रूप्यं रूपकमध्यगम् ॥ पश्य नीलो
त्पलद्वन्द्वान्निःसरन्ति सिताः शराः ॥४६॥ प्रौढोक्तिस्तदशक्तस्य तच्छ नृसिंह
क्तत्वावकल्पनम् ॥ कलिन्दजातीररुहाः श्यामलाः सरलद्रुमाः ॥४७॥ ॥५॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सम्भावनं यदीत्थंस्यादित्यूहोन्यप्रसिद्धये॥ स्फटिककुम्भान्तः
स्थितिश्श्वेतीकृते जलैः॥ ४८॥ मौक्तिकं चेल्लतां सूते तत्पुष्पैस्ते सम
र्य्यँशाः॥ वाञ्छितादधिकप्राप्तिरयत्नेन प्रहर्षणम्॥ ४९॥ दीपमु
द्योजयेद्यावत्तावदभ्युदितो रविः॥ इष्यमाणविरुद्धार्थसम्प्रा
प्तिस्तु विषादनम्॥ ५०॥ दीपमुद्योतयेद्यावत्तावन्निर्वाण एव सः
॥ क्रियादिभिरनेकस्य तुल्यता तुल्ययोगिता॥ ५१॥ संकुचन्ति स
रोजानि स्वैरिणीवदनानि च॥ प्राचीनाचलचूडाग्रचुम्बिबिम्बे



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चन्द्रा॰ सुधाकरे ॥५२॥ प्रस्तुताप्रस्तुतानाञ्च तुल्यत्वे दीपकं मतं ॥ मेधाम्बु
॥६॥ धः सुधामिन्दुर्बिभर्ति वसुधां भवान् ॥५३॥ आवृत्ते दीपकपदे भवे
दावृत्ति दीपकम् ॥ दीप्त्याग्निर्भाति भातीन्दुः कान्त्या भाति रविस्त्वि
षा ॥५४॥ वाक्ययोरर्थसामान्ये प्रतिवस्तूपमा मता ॥ तापेन भ्राज
ते सूर्यः शूरश्चापेन राजते ॥५५॥ चेद्बिम्बप्रतिबिम्बत्वे दृष्टान्तस्त
दलङ्कृतिः ॥ स्यान्मल्लप्रतिमल्लत्वे संग्रामोद्दामहुङ्कृतिः ॥५६॥ दृष्टा नृसिंह
तश्चेद्द्रवन्मूर्तिस्तन्मृष्टा दैवदुर्लिपिः ॥ जाता चेत्प्राक्प्रभा भानोस्तर्हि ॥६॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

याता विभावरी ॥५७॥ वाक्यार्थयोः सदृशयोरैक्यारोपो निदर्शना ॥ यद्दा
तुः सौम्यता सेयं सुधांशोरकलङ्कता ॥५८॥ व्यतिरेको विशेषश्चेदुपमा
नोपमेययोः ॥ शैला इवोन्नताः सन्तः किन्तु प्रकृतिकोमलाः ॥५९॥
सहोक्तिः सहभावश्चेद्भासते जनरंजनः ॥ दिगन्तमगमद्यस्य कीर्तिः
प्रत्यर्थिभिः सह ॥६०॥ विनोक्तिश्चेद्विना किंचित्प्रस्तुतं हीनमुच्यते ॥
विद्या हृद्यापि सावद्या विना विनयसम्पदं ॥६१॥ समासोक्तिः परि
स्फूर्त्तिः प्रस्तुतेऽप्रस्तुतस्य चेत् ॥ अयमैन्द्रीमुखम्पश्य रक्तश्चुम्बति



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चन्द्रा॰ चन्द्रमाः॥६२॥खण्डश्लेषः पदानाञ्चेदं केकं पृथगर्थता॥उच्छलद्भूरि
॥७॥ कीलालश्शुभेवाहिनीपतिः॥६३॥भङ्गश्लेषः पदस्तोमस्यैवचेत्
पृथगर्थता॥अजरामरताकस्य नो योध्येवपुरीप्रिया॥६४॥अर्थ
श्लेषोर्थमात्रस्य यघनेकार्थसंश्रयः॥ कुटिलाःश्यामलादीर्घाः
कयाक्षाः कुन्तलाश्चते॥६५॥अप्रस्तुतप्रशंसास्यात्सा यत्र प्रस्तुता
नुगा॥कार्यकारणसामान्यविशेषादेरसौमता॥६६॥कमलैः नृसिंह
कमलावासैः किं किं नासादि सुन्दरम्॥अप्यम्बुधेः परं पारं मन्या ॥७॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्तिव्यवसायिनः॥६७॥भवेदर्थान्तरन्यासोऽनुषक्तार्थान्तराभिधा
॥हनूमानब्धिमतरद्दुष्करंकिंमहात्मनाम्॥६८॥यस्मिन्विशेष
सामान्यविशेषाःसविकस्वरः॥सनजिग्येमहान्तोहिदुर्धषाः
क्ष्माधराइव॥६९॥कार्याद्येऽप्रस्तुतेरुक्तेपर्यायोक्तिंप्रचक्षते॥
तृणान्युङ्करयामासविपक्षनृपसद्मसु॥७०॥उक्तिर्व्याजस्तुति
र्निन्दास्तुतिभ्यांस्तुतिनिन्दयोः॥कस्तेविवेकोनयसिस्वर्गपातकि
नोपियत्॥७१॥आक्षेपस्तुप्रयुक्तस्यप्रतिषेधोविचारणात्॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चन्द्रा॰ चन्द्रसन्दर्शीयात्मानमथवास्तित्रियामुखम्॥७२॥गूढाक्षेपोविधौ
॥८॥ व्यक्तेनिषेधेचास्फुटेसति॥हरसीतांसुखंकिन्तुचिन्तयान्तकदोक
नम्॥७३॥विरोधोनुपपत्तिश्चेद्गुणद्रव्यक्रियादिषु॥अमन्दचन्दन
स्यन्दःस्वच्छन्दंदहतीतिमाम्॥७४॥श्लेषादिभूर्विरोधश्चेद्विरोधाभा
सतामता॥अप्यन्धकारिणानेनजगद्देतत्प्रकाश्यते॥७५॥असम्भ
वोर्थनिष्पत्तावसम्भाव्यत्ववर्णनम्॥कोवेदगोपाशिशुकःशैलमुत्पाटयिष्यति॥७६॥विभावनाविनापिस्यात्कारणङ्कार्यजन्मचेत्॥ ॥८॥ नृसिंह

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परस्य लाक्षा रसासिक्तं रक्तं तच्चरणद्वयं ॥ ७७ ॥ विशेषोक्तिरनुत्पत्तिः कार्य
स्य सति कारणे ॥ नमन्तमपि धीमन्तं न लङ्घयति कश्चन ॥ ७८ ॥ आ
ख्याते भिन्नदेशत्वे कार्यहेत्वोरसङ्गतिः ॥ त्वद्भक्तानां नमत्यङ्गं भङ्गमेति
भवक्रमः ॥ ७९ ॥ विषमं यद्यनौचित्यादनेकान्वयकल्पनम् ॥ क्वाति
तीव्रविषास्सर्पाः क्वासौ चन्दनभूरुहः ॥ ८० ॥ सममौचित्यतोऽनेकव
स्तुसम्बन्धवर्णनम् ॥ अनुरूपं कृतं सद्म हारेण कुचमण्डलम् ॥ ८१ ॥ वि
चित्रं चेत्प्रयत्नः स्याद्विपरीतफलप्रदः ॥ नमन्ति सन्तस्त्रैलोक्यादपि



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चन्द्रा० लब्धुं समुन्नतिं ॥८२॥ अधिकं बोध्यमाधाराद्राधेयाधिक्यवर्णनम् ॥ यया व्या
॥९॥ प्तं जगत्तस्यां वाचि मान्ति न ते गुणाः ॥८३॥ अन्योन्यं नाम यत्र स्यादुपकारः
परस्परम् ॥ त्रियामा शशिना भाति शशी भाति त्रियामया ॥८४॥ विशेषः
स्यात्तमाधारं विनाप्याधेयवर्णनम् ॥ गतेपि सूर्ये दीपस्थास्तमश्छिन्दन्ति स
त्कराः ॥८५॥ स्याद्व्याघातोऽयथाकारि वस्त्वन्यत्क्रियमुच्यते ॥ यैर्जगत्प्री
यते हन्ति तैरेव कुसुमायुधः ॥८६॥ गुम्फः कारणमाला स्याद्यथाप्राक्प्रा नृसिंह
त्तकारणैः ॥ नयेन श्रीः श्रिया त्यागस्त्यागेन विपुलं यशः ॥८७॥ गृही ॥९॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तमुकरीत्यर्थश्चेणिरेकावलीमता॥ नेत्रेकर्णान्तविश्रान्ते कर्णौ दो र्मूलदो
लिनौ॥८८॥ दीपकैकावलीयोगान्मालादीपकमुच्यते॥ स्मरेरण हृद
ये तस्यास्तेन त्वयि कृता स्थितिः॥८९॥ सारो नाम पदोत्कर्षः सारता
याय थोत्तरम्॥ सारं सारस्वतन्तत्र काव्यं तत्र शिवस्तवः॥९०॥ उदा
रसारश्चेज्जातिभिन्नो भिन्नतया गुणः॥ मधुरं मधु पीयूषं तस्मादस्मा
त्कवेर्वचः॥९१॥ यथासंख्यं द्विधार्थाश्चेद् क्रमादेकैकमन्विताः॥ शत्रुमि
त्रं द्विषत्पक्षं जयरञ्जय भंजय॥९२॥ पर्यायः स्यादनेकत्र स्यादेकस्य स



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चन्द्रा० मन्वयः॥ पद्मं मुक्त्वा गता चन्द्रं कामिनी वदनप्रभा॥९३॥ परिवृत्तिर्वि
॥१०॥ निमयो न्यूनाभ्यधिकयोर्मिथः॥ जग्राहैकं शरं मुक्त्वा कटाक्षान्स रिपुश्रियोषि
तां॥९४॥ परिसंख्या निषिध्यैकमेकस्मिन्वस्तुयन्त्रणं॥ स्नेहक्षयः प्रदी
पेषु न स्वान्तेषु नतभ्रुवां॥९५॥ विकल्पस्तुल्यबलयोर्विरोधश्चातुरीयु
तः॥ कान्ता चित्ते धरे चापि कुरु त्वं चीतरागितां॥९६॥ भूयसामेकसंबन्ध
भाजां गुम्फः समुच्चयः॥ नश्यन्ति पश्चात्पश्यन्ति भ्रश्यन्ति च तव द्विषः॥ नृसिंह
९७॥ समाधिः कार्यसौकार्यं कारणान्तरसन्निधेः॥ उत्कंठितां च कल ॥१०॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यत्रागामास्तं चभानुमानू॥ ९८॥ प्रत्यनीकं बलवतः शत्रोः
पक्षेपराजयः॥ जैत्रनैत्रानुगौ कर्णावुत्पलाभ्यामधः कृतौ॥ ९९॥
प्रतीपमुपमानस्य हीनत्वमुपमेयतः॥ दृष्टं चेद्वदनं तस्याः किंप
द्मेन किमिंदुना॥ १००॥ उल्लासोन्य महिम्नाचेद्दोषोह्यन्यत्र वर्ण्यते॥
तदभाग्यं धनस्यैव यन्नाश्रयति सज्जनं॥ १०१॥ तद्गुण स्वगुण
त्यागादन्यतः स्वगुणोदयः॥ पद्मरागारुणं नासामौक्तिकं तेऽध
राश्रितं॥ १०२॥ पुनः स्वगुण संप्राप्तिर्विज्ञेया पूर्वरूपता॥ हर



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चं॰लो॰ कंठाश्रुलिप्तो पिरोषस्त्व यशासासितः ॥१०३॥ यद्वस्तुनोन्यथारूपंत
॥११॥ थास्यात्पूर्वरूपता ॥ दीपे निर्वापिते प्यासीत्कांचीरत्नैरहर्महः ॥१०४॥
संगतान्यगुणानंगीकारमाहुरतद्गुणं ॥ चिरशान्नपि रवेर्मध्यंशीत एवस
दाराशी ॥१०५॥ प्राक्सिद्धस्व गुणोत्कर्षोनुगुणः परसंनिधेः ॥ कर्णोत्प
लानि दधते कटाक्षैरतिनीलतां ॥१०६॥ अवज्ञावर्ण्यते वस्तुगुणदोषा
क्षमं यदि ॥ म्लायंति यदि पद्मानि काहानिरमृतद्युतेः ॥१०७॥ प्रश्नोत्तरंक्र नृसिंह
मेणोक्तौ स्यूतमुत्तरमुत्तरं ॥ यत्रैव वेतसी पांथ तत्रैव सुतरा सरित् ॥१०८॥ पिहितंपरवृ ॥११॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्तान्तज्ञातुरन्यस्य चेष्टितं ॥ प्रियेगृहागते प्रातः कान्ता तल्पमकल्पय
त् ॥१०९॥ व्याजोक्तिः केनचित्सम्यक्लक्ष्यमनावस्तुगोपनं ॥ सखि पश्य गृ
हारामं केसरैरस्मि धूसरा ॥११०॥ वक्रोक्तिः श्लेषकाकुभ्यां वाच्यार्थान्तर
कल्पनम् ॥ मुच्यमानं दिनं प्राप्तं न हनन्दी हरान्तिके ॥१११॥ स्वभावोक्तिः
स्वभावस्य जात्यादिषु च वर्णनं ॥ कुरङ्गैः रुत्तरंगाक्षिस्तब्धकर्णैरुदीक्ष्य
ते ॥११२॥ भाविकं भूतभाव्यर्थसाक्षाद्दर्शनवर्णनम् ॥ अहं विलोकया
द्यापि युध्यन्तेऽत्र सुरासुराः ॥११३॥ देशात्मविप्रकृष्टस्य दर्शनं भावि



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चन्द्रा० कृच्छविः ॥त्वंवसन्हृदये तस्याः साक्षात्पंचेषुरीक्ष्यसे ॥११४॥उदात्तमृद्धि
॥१२॥ श्चरितंश्लाघ्यंचान्योपलक्षणं॥सानोयस्याभवद्युद्धं तद्धूर्जटिकिरीटि
नोः॥११५॥अत्युक्तिरद्भुतातथ्यश्लोयौदार्यादिवर्णनम्॥त्वयिदातरि
राजेन्द्र याचकाः कल्पशाखिनः॥११६॥रसभावतदाभासभावशान्ति
निबन्धना॥रसवत्प्रेयऊर्जस्वित्समाहितमयीभिदा॥११७॥भावाना
मुदयः सन्धिः शाबलत्वमितित्रयः॥अलंकारानिमान्सप्तकेचिदाहुर्मनी नृसिंह
षिणः॥११८॥शुद्धिरेकप्रधानत्वंतथासंसृष्टिसङ्करौ॥एतेषामेवविन्या ॥१२॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चन्द्रा ॥१३॥

सा नालंकारांतराण्यमी ॥११९॥ सर्वेषां च प्रतिद्वन्द्व प्रतिच्छन्दभिदाभृ
तां ॥ उपाधिः क्वचिदुद्भिन्नः स्यादन्यत्रापि संभवात् ॥१२०॥ मालापरं
पराचैषां भूयसामनुकूलके ॥ मनुष्ये भवतः कापि ह्यलंकारांगतां गते ॥
१२१॥ पदे पदार्थे वाक्यार्थे वाक्यार्थस्तबके तथा ॥ एते भवन्ति विन्यासाः स्व
भावातिशयात्मकाः ॥१२२॥ कस्याप्यतिशयस्योक्तेरित्यन्वर्थविचारणा
त् ॥ प्रायेणामी ह्यलंकारा भिन्ना नातिशयोक्तितः ॥१२३॥ अलंकारप्र
धानेषु प्रधानेष्वपि साम्यतां ॥ वैलक्षण्यं प्रतिस्मक्ति प्रतिभाति सुखेष्विव
॥१२४॥ अलंकारेषु तथ्येषु यद्घनास्था मनीषिणां ॥ तद्वर्याचीनभेदेषु ना
स्था बोध इच्छता ॥१२५॥

महादेवः सत्रप्रमुखमखविधेकचतुरः सुमित्रा तद्भक्तिप्रणिहितमतिर्यस्य पितरौ ॥ चतुर्थः
सैकोयं सुकविजयदेवेन रचिते चिरं चन्द्रालोके सुखयतु मयूखः सुमनसः ॥१२६॥ शुभं ॥

॥ मौहूर्तिकोपनाम्ना वैलिखितं राजरामेण ॥ धीमत्सद्गुरुरक्तेन चन्द्रालोकस्य पुस्तकम् ॥१॥

नृसिंह ॥१३॥



CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

॥इतिचन्द्रालोकस्समाप्यते॥

२

KKSU LIBRARY
RAMTEK
441 106
M-1850
Dist. Nagpur

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=22.10.20 12:43
,TRANSFERRED=2020/10/22 at 12:46:05
,PAGES=26
,TYPE=STD
,NAME=S0004379
,Book Name=M-1820-CHANDRALOK
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection